R
Mou

# राजवाहनचरितम्

D-23.03.2020.

Sem-2/CC-3/Section-B

"दण्डिनः पदलालित्यम्" - उद्धृतांशस्य तात्पर्य्यं निरूपयतु ।
अथवा,
दण्डिनः रचनाशैलीं विश्लेषयतु ।

संस्कृतगद्यसाहित्यस्य अत्युच्चस्थाने विराजते दण्डी। लोककथाम् अवलम्ब्य स्वप्रतिभाबलेन अत्युत्तमं गद्यकाव्यं रचितं तेन। राजप्रासादस्य क्षुद्रसीमाम् अतिक्रम्य समाजस्य अभ्यन्तरे स विराजितवान्। दशकुमारचरितं तस्य अत्युज्ज्वलं दृष्टान्तम् ।

दण्डिनः गद्यरचना अतीव सुमधुरं सरलं ~~प्राञ्ज~~ प्राञ्जलञ्च । दीर्घसमासबद्धपदरचना एव ओजोगुणस्य मूलम् । तस्य रचनायां ओजोगुणस्य प्रयोगः दृश्यते, परन्तु सुबन्धुबाणाभ्याम् अतीव स्वल्पम् । अधिकांशे स्थले तस्य गद्यं सहजबोध्यं सुखपाठ्यं च ।

सुललिता पदरचना दण्डिनः वैशिष्ट्यम् । यथा कालिदासस्य उपमा भारविकवेः अर्थगौरवं च तथा दण्डिनोऽपि ललितपदविन्यासः । उक्तञ्च सहृदयेन केनचित् ——

"उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥"

शब्दचयने नैपुण्यमेव अस्य प्रसिद्धेः प्रधानभूतं कारणम् । शब्दार्थयोः अपरूपं समन्वयं दण्डिनः काव्यस्य मुख्यभूतं विषयम् । राजवाहनचरितस्य प्रथमे उच्छ्वासे विशृङ्खलस्य कन्यान्तःपुरस्य वर्णनायां पदलालित्यस्य एकं दृष्टान्तम् ——

"उपलभ्यैव च किमेतदित्यतिपरित्रासविह्वला ~~मुक्तकण्ठमाचक्रन्द~~ मुक्तकण्ठमाचक्रन्द राजकन्या। येन च तत्सकलमेव कन्यान्तःपुरम् अग्निपुरतमिव पिशाचोपहृतमिव वेपमानम् अनिरूप्यमाणतदात्वायतिविभागम् अगण्यमानरहस्यरक्षासमयम् अवनितलविप्रविध्यमानगात्रम् आक्रन्दविदीर्यमाणकण्ठम् अश्रुस्रोतोऽवगुण्ठितकपोलतलम् आकुलीबभूव ।"

Scanned with CamScanner

चरित्रचित्रणे अपि दण्डिनः कुशलता विद्यते। यथा भीषणपुरुषः चण्डवर्मा तथा मनोमोहिनी अवन्तिसुन्दरी तस्य काव्ये अतिस्पष्टरूपेण चित्रीयते। काव्यशास्त्रस्य रस-रीति-गुण-अलंकारादीनां प्रयोगे स आसीत् सिद्धहस्तः। ~~कथासा~~ कथा-साहित्यस्य मूलभूतः अद्भुतरसः तस्य काव्ये अतीव प्राणवन्तः। उपमा-रूपक-उत्प्रेक्षा-व्यतिरेक-निदर्शना-श्लेष-यमकादयः अपि सार्थकरूपेण उपन्यस्तः।

—— 0 ——

Scanned with CamScanner